श्री पार्वती श्रीकंठ स्तोत्रं

श्री पार्वती श्रीकंठ स्तोत्रं

(श्रीगरलपुरतः प्रस्थानसमये)
बहुभ्यो घस्रेभ्यस्तव पदसरोजातयुगलं
निरीक्ष्याहं मोदं बहुलमगमं शैलतनये |
भविष्यान्मातस्त्वत्पदयुगसरोजातविरहा-
द्भवेद्यः खेदस्तं शमय हृदयाब्जे विलसनात् ||1||

प्रभोऽष्टमूर्ते मम चित्तमध्ये संस्थाप्य चैकां तव मूर्तिमारात् |
अपि स्थितस्य प्रमुदं विधेहि का ते क्षतिस्तेन कृपापयोधे ||2||

मन्मूर्तिमेकां तव पादमूले दधासि यस्माच्छशिबालमौले |
तस्माच्च मन्मानसपंकजाते त्वया विधेया तव मूर्तिरेका ||3||

आकाशस्य विभुत्वात्तत्रस्थत्वाच्च पादपद्मस्य |
तव नटनाथ पदं मच्चित्ते स्फुरताद्धि यत्र कुत्रापि ||4||

इति शृंगेरि श्रीजगद्गुरु श्रीसच्चिदानंदशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितं श्रीपार्वतीश्रीकंठस्तोत्रं संपूर्णं |